॥ शनि ग्रह मंत्र, जप, कवच, स्तोत्र ॥

अनुक्रमाणिका

शनि यन्त्रम्

अर्काद्रिमन्वा स्मर रुद्र अंका
नागाख्यातिथ्यादश मंद यन्त्रम् ।
विलिख्य भूर्जोपरिधार्यमेत
च्छनेः कृतारिष्ट निवारणाय ॥

१२	७	१४
१३	११	९
८	१५	१०

॥ शनि ग्रह ॥

शनि सौराष्ट्र देश में उद्भव। कश्यप गोत्र। जाति असुर। माता छाया। कृष्ण वर्ण। पश्चिम दिशा।

- **शुभाशुभत्व** — **पाप ग्रह**
- **भोग काल** — **912.5 दिन (ढाई वर्ष)**
- **बीज मंत्र** — **ॐ शनैश्चराय नमः।** — अष्टाक्षर मन्त्र
  - **ॐ शं शनैश्चराय नमः।** — नवाक्षर मन्त्र
  - **ॐ ऐं ह्रीं श्रीं शनैश्चराय नमः।**
  - **ॐ शनये नमः।**
- **तांत्रिक मंत्र** — **ॐ प्राँ प्रीं प्रौं स: शनये नमः।** — दशाक्षर मन्त्र
  - **ॐ प्राँ प्रीं प्रौं स: शनैश्चराय नमः।** — द्वादशाक्षर मन्त्र
  - **ॐ ह्रीं श्रीं ग्रहचक्रवर्तिने शनैश्चराय क्लीं ऐंसः स्वाहा।** — आगमलहर्याम्
- **वैदिक मंत्र** — **ॐ शन्नो देवीरभिष्टय आपो भवन्तु पीतये। शँयो रभिस्त्रवन्तु नः॥**
- **पुराणोक्त मंत्र** — **ॐ नीलांजन समाभासं रविपुत्रं यमाग्रजम।**
  छायामार्तण्ड संभूतं तं नमामि शनैश्चरम॥
- **अधिदेवता-यमम्** — **ॐ यमाय त्वांगिरस्वते पितृमते स्वाहा।**
  स्वाहा धर्माय स्वाहा धर्मः पित्रे॥
- **प्रत्यधिदेवता-प्रजापतिम्** — **ॐ प्रजापते न त्वदेता अन्यन्यो विश्वा रुपाणि परिता बभूव।**
  यत्कामास्ते जुहुमस्तन्नों अस्तु वयं ७ स्याम पतयो रयीणाम्॥
- **शनि ग्रायत्री** — **ॐ भूर्भुवः स्वः शन्नो देवीरभिष्टये विद्महे नीलांजनाय धीमहि तन्नो शनिः प्रचोदयात्**
- **जप संख्या** — **23,000 कलयुगे चतुर्थगुणो अर्थात 92,000**
  + दशांश हवन 9,200
  + दशांश तर्पण 920
  + दशांश मार्जन 92 = 1,02,212
- **जप समय** — **मध्याह्नकाल**
- **हवनवस्तु** — **शमी**
- **रत्न** — **नीलम - 5 से 7.5 रत्ती, शनिवार, पश्चिम दिशा, रात्री 10 बजे, मध्यमा**

- **शनि प्रार्थना**

  नीलद्युतिः शूलधरः किरीटी, गृध्रस्थितस्त्राणकरो धनुष्मान्।
  चतुर्भुजः सूर्यसुतः प्रशान्तो, वरप्रदो मेऽस्तु स मन्दगामी॥

  - जो नीली आभा वाले, शूल धारण करने वाले, मुकुट धारण करने वाले, गृध्र पर विराजमान, रक्षा करने वाले, धनुष को धारण करने वाले, चार भुजा वाले, शान्त स्वभाव, एवं मन्द गतिवाले हैं, वे सूर्य पुत्र शनि मेरे लिये वर देनेवाले हों।

- **शनिश्चर का व्रत**

  ५१ या १९ शनिवारों तक करना चाहिये। काला वस्त्र धारण करके **'ॐ प्रां प्रीं प्रौं सः शनये नमः'** इस मन्त्र की १९, ११ या ५ माला जपे। जप करते समय एक पात्र में शुद्ध जल, काला तिल, दूध, चीनी और गंगाजल अपने पास रख ले। जप के बाद इसको पीपल वृक्ष की जड़ में पश्चिम मुख होकर चढ़ा दे। भोजन में उड़द (कलाई) के आटे से बनी चीजें पंजीरी, पकौड़ी, चीला और बड़ा इत्यादि खाये। कुछ तेल में बनी चीजें अवश्य खाये। फल में केला खाये। इस व्रत के करने से सब प्रकार की सांसारिक झंझटें दूर होती हैं। झगड़े में विजय प्राप्त होती है। लोहे, मशीनरी, कारखाने वालों के लिये यह व्रत व्यापार में उन्नति और लाभदायक होता है।

- **अनिष्टे शनौ शान्ति स्नानम्**

  - **बलाञ्जनश्यामतिलैः सलाजैः, सरोध्रजीमूतशतप्रसूनैः।**
  - **यमानुजादाप्तमनिष्टमुग्रं, विलीयते मजनतोऽप्यशेषम्॥**
  - शनिश्चर की अनिष्ट-शान्ति के लिये बरियारा के बीज (खरेटी), काला सुरमा, काले तिल, धान का लावा, लोध, मोथा और सौंफ से स्नान करना चाहिये।

- **शनि दान**

  नीलकं महिषं वस्त्रं कृष्णं लौहं सदक्षिणम्।
  विश्वामित्रप्रियं दद्याच्छनिदुष्टप्रशान्तये॥

  - **माषांश्च तैलं विमलेन्द्रनीलं तिलाः कुलित्था महिषी च लोहम्।**
    कृष्णा च धेनुः प्रवदन्ति नूनं दुष्टाय दानं रविनंदनाय॥
  - शनि दोष की शान्ति हेतु नीलम, भैंसा, काला वस्त्र, लोहा तथा जटा नारियल [उड़द, तिल, छाता, जूता एवं कम्बल] का दान दक्षिणा के साथ करना चाहिये। सुवर्ण, कृष्णपुष्प
  - जन्मपत्रिका में यदि शनि की स्थिति शुभफल दात्री न हो तो काले वर्ण की गाय एवं तैल का दान करना चाहिये।

॥ शनैश्चर वैदिक मन्त्र न्यासादि प्रयोग: ॥

- **वैदिक मंत्र** — **ॐ शन्नो देवीरभिष्टय आपो भवन्तु पीतये ।**
शँयो रभिस्त्रवन्तु नः ॥

- **विनियोग:-** — ॐ शन्नोदेवीरिति मंत्रस्य दध्यङ्डाथर्वण ऋषिः । गायत्री छन्दः । शनिर्देवता ।
आपो बीजम् । वर्तमान इति शक्तिः । शनैश्चर प्रीत्यर्थे जपे विनियोगः ॥

- **ऋष्यादि न्यास** — ॐ दध्यङ्डाथर्वणऋषये नमः शिरसि । ॐ गायत्री छंदसे नमः मुखे ।
ॐ शनैश्चर देवतायै नमः हृदये । ॐ आपोबीजाय नमः गुह्ये ।
ॐ वर्त्तमानशक्तये नमः पादयोः । विनियोगाय नमः सर्वाङ्गे ॥

- **करन्यास** — ॐ शन्नोदेवीरित्यङ्गष्टाभ्यां नमः । ॐ अभिष्टये तर्जनीभ्यां नमः ।
ॐ आपोभवंतु मध्यमाभ्यां नमः । ॐ पतिय अनामिकाभ्यां नमः ।
ॐ शंय्योरिति कनिष्ठिकाभ्यां नमः । ॐ अभिस्त्रवंतुनः करतलकर पृष्ठाभ्यां नमः॥

- **हृदयादि न्यास:-** — ॐ शन्नोदेवीरिति हृदयाय नमः । ॐ अभिष्टये शिरसे स्वाहा ।
ॐ आपो भवंतु शिखायै वषट् । ॐ पीतये कवचाय हुं ।
ॐ शंय्योरिति नेत्रत्रयाय वौषट् । ॐ अभिस्त्रवंतुनः अस्त्राय फट् ॥

- **मंत्रन्यास:-** — ॐ शन्न इति शिरसि । ॐ देवीरिति ललाटे । ॐ अभिष्टये मुखे ।
ॐ आपो हृदये । ॐ भवन्तु नाभौ । ॐ पीतये कट्याम् । ॐ शंय्योरूर्वोः ।
ॐ अभिस्त्रवन्तु जानुनोः । ॐ नः पादयोः ॥

॥ शनि वज्र पंजर कवचम् ॥

- **विनियोग** अस्य श्री शनैश्चर कवच स्तोत्र मन्त्रस्य । कश्यप ऋषिः । अनुष्टुप् छन्द । शनैश्चरो देवता । श्री शक्तिः । शूं कीलकम् । शनैश्चर प्रीत्यर्थे पाठे विनियोगः ।

- **ध्यानम्** **नीलाम्बरो नीलवपुः किरीटी गृध्रस्थितस्त्रासकरो धनुष्मान् ।**
  चतुर्भुजः सूर्यसुतः प्रसन्नः सदा मम स्याद्वरदः प्रशान्तः ॥ १ ॥

- **ब्रह्मोवाच** **श्रृणुध्वमृषयः सर्वे शनिपीडाहरं महत् ।**
  कवचं शनिराजस्य सौरेरिदमनुत्तमम् ॥ ॥ २ ॥

  - **कवचं देवतावासं वज्रपंजरसंज्ञकम् ।**
    शनैश्चरप्रीतिकरं सर्वसौभाग्यदायकम् ॥ ॥ ३ ॥
  - **ॐ श्रीशनैश्चरः पातु भालं मे सूर्यनंदनः ।**
    नेत्रे छायात्मजः पातु कर्णो यमानुजः ॥ ॥ ४ ॥
  - **नासां वैवस्वतः पातु मुखं मे भास्करः सदा ।**
    स्निग्धकण्ठश्च मे कण्ठ भुजौ पातु महाभुजः ॥ ॥ ५ ॥
  - **स्कन्धौ पातु शनिश्चैव करौ पातु शुभप्रदः ।**
    वक्षः पातु यमभ्राता कुक्षिं पात्वसितस्थता ॥ ॥ ६ ॥
  - **नाभिं गृहपतिः पातु मन्दः पातु कटिं तथा ।**
    ऊरू ममाऽन्तकः पातु यमो जानुयुगं तथा ॥ ॥ ७ ॥
  - **पदौ मन्दगतिः पातु सर्वांग पातु पिप्पलः ।**
    अंगोपांगानि सर्वाणि रक्षेन् मे सूर्यनन्दनः ॥ ॥ ८ ॥
  - **इत्येतत् कवचं दिव्यं पठेत् सूर्यसुतस्य यः ।**
    न तस्य जायते पीडा प्रीतो भवन्ति सूर्यजः ॥ ॥ ९ ॥
  - **व्ययजन्मद्वितीयस्थो मृत्युस्थानगतोऽपि वा ।**
    कलत्रस्थो गतोवाऽपि सुप्रीतस्तु सदा शनिः ॥ ॥१०॥
  - **अष्टमस्थे सूर्यसुते व्यये जन्मद्वितीयगे ।**
    कवचं पठते नित्यं न पीडा जायते क्वचित् ॥ ॥११॥
  - **इत्येतत् कवचं दिव्यं सौर्येन्निर्मितं पुरा ।**
    जन्मलग्नस्थितान्दोषान् सर्वान्नाशयते प्रभुः ॥ ॥१२॥

॥ श्री ब्रह्माण्डपुराणे ब्रह्म-नारद संवादे शनैश्चर कवचम् सम्पूर्णम् ॥

॥ शनि स्तोत्रम् - १ ॥

- नम: कृष्णाय नीलाय शितिकण्ठ निभाय च।
  नम: कालाग्निरूपाय कृतान्ताय च वै नम: ॥ ॥ १ ॥
- नमो निर्मांस देहाय दीर्घश्मश्रुजटाय च।
  नमो विशालनेत्रय शुष्कोदर भयाकृते ॥ ॥ २ ॥
- नम: पुष्कलगात्रय स्थूलरोम्णेऽथ वै नम:।
  नमो दीर्घायशुष्काय कालदष्ट्र नमोऽस्तुते ॥ ॥ ३ ॥
- नमस्ते कोटराक्षाय दुर्निरीक्ष्याय वै नम:।
  नमो घोराय रौद्राय भीषणाय कपालिने ॥ ॥ ४ ॥
- नमस्ते सर्वभक्षाय वलीमुखायनमोऽस्तुते।
  सूर्यपुत्र नमस्तेऽस्तु भास्करे भयदाय च ॥ ॥ ५ ॥
- अधोदृष्टे: नमस्तेऽस्तु संवर्तक नमोऽस्तुते।
  नमो मन्दगते तुभ्यं निरिस्त्रणाय नमोऽस्तुते ॥ ॥ ६ ॥
- तपसा दग्धदेहाय नित्यं योगरताय च।
  नमो नित्यं क्षुधार्ताय अतृप्ताय च वै नम: ॥ ॥ ७ ॥
- ज्ञानचक्षुर्नमस्तेऽस्तु कश्यपात्मज सूनवे।
  तुष्टो ददासि वै राज्यं रुष्टो हरसि तत्क्षणात् ॥ ॥ ८ ॥
- देवासुरमनुष्याश्च सिद्धि विद्याधरोरगा:।
  त्वया विलोकिता: सर्वे नाशंयान्ति समूलत: ॥ ॥ ९ ॥
- प्रसाद कुरु मे देव वाराहोऽहमुपागत।
  एवं स्तुतस्तदा सौरिर्ग्रहराजो महाबल: ॥ ॥१०॥

॥ शनि स्तोत्रम् (दशरथ कृत) ॥

- **विनियोग** अस्य श्री शनैश्चर स्तोत्रं। दशरथः ऋषि। शनैश्चरो देवता। त्रिष्टुप् छंद। शनैश्चर प्रीत्यर्थे जपे विनियोगः॥

- **दशरथ उवाच**
  - **कोणोऽन्तको रौद्रयमोऽथ बभ्रुःकृष्णः शनि पिंगलमन्दसौरिः।**
    नित्यं स्मृतो यो हरते पीड़ां तस्मै नमः श्रीरविनन्दाय॥ ॥ १ ॥
  - **सुरासुराः किंपुरुषोरगेन्द्रा गन्धर्व-विद्याधरपन्नगाश्च।**
    पीडयन्ति सर्वे विषमस्थितेन तस्मै नमः श्री रविनन्दनाय॥ ॥ २ ॥
  - **नराः नरेन्द्राः पशवो मृगेन्द्रा वन्याश्च ये कीटपतंगभृंगा।**
    पीडयन्ति सर्वे विषमस्थितेन तस्मै नमः श्री रविनन्दनाय॥ ॥ ३ ॥
  - **देशाश्च दुर्गाणि वनानि यत्र सेना निवेशः पुरपत्तनानि।**
    पीडयन्ति सर्वे विषमस्थितेन तस्मै नमः श्री रविनन्दनाय॥ ॥ ४ ॥
  - **तिलैर्यवैर्माषगुडान्नदानै लोहेन नीलाम्बर-दानतो वा।**
    प्रीणाति मन्त्रैर्निजवासरे च तस्मै नमः श्री रविनन्दनाय॥ ॥ ५ ॥
  - **प्रयाग कूले यमुनातटे च सरस्वती पुण्यजले गुहायाम्।**
    यो योगिनां ध्यानगतोऽपि सूक्ष्मस्तस्मै नमः श्री रविनन्दनाय॥ ॥ ६ ॥
  - **अन्यप्रदेशात्स्वःगृहं प्रविष्टस्तदीयवारे स नरः सुखी स्यात।**
    गहाद्गतो यो न पुनः प्रयाति तस्मै नमः श्री रविनन्दनाय॥ ॥ ७ ॥
  - **स्त्रष्टा स्वयं भूर्भुवनत्रयस्य त्रोता हरीशो हरते पिनाकीः।**
    एक स्त्रिधा ऋग्यजुःसाममूर्तिस्तस्मै नमः श्री रविनन्दनाय॥ ॥ ८ ॥
  - **शन्यष्टकं यः प्रयतः प्रयाते नित्यं सुपुत्रैः पशुबान्धवैश्च।**
    पठेतु सौख्यं भुवि भोगयुक्तः प्राप्नोति निर्वाण पदं तदन्ते॥ ॥ ९ ॥
  - **कोणस्थः पिंगलो बभ्रूः कृष्णो रौद्रान्तको यमः।**
    सौरिः शनैश्चरो मन्दः पिप्पलादेन संस्तुतः॥ ॥१०॥
  - **एतानि दश नामानि प्रतारुत्थाय यः पठेत्।**
    शनैश्चकृता पीड़ा न कदाचिद् भविष्यति॥ ॥११॥

॥ इति श्री दशरथ कृत शनि स्तोत्रम् सम्पूर्णम्॥

॥ श्री शनि अष्टोत्तरशत नामावली ॥

1. ॐ श्री शनैश्चराय नमः।
2. ॐ शान्ताय नमः।
3. ॐ सर्वाभीष्टप्रदायिने नमः।
4. ॐ शरण्याय नमः।
5. ॐ वरेण्याय नमः।
6. ॐ सर्वेशाय नमः।
7. ॐ सौम्याय नमः।
8. ॐ सुरवन्द्याय नमः।
9. ॐ सुरलोकविहारिणे नमः।
10. ॐ सुखासनोपविष्टाय नमः।
11. ॐ सुन्दराय नमः।
12. ॐ घनाय नमः।
13. ॐ घनरूपाय नमः।
14. ॐ घनाभरणधारिणे नमः।
15. ॐ घनसारविलेपाय नमः।
16. ॐ खद्योताय नमः।
17. ॐ मन्दाय नमः।
18. ॐ मन्दचेष्टाय नमः।
19. ॐ महनीयगुणात्मने नमः।
20. ॐ मर्त्यपावनपदाय नमः।
21. ॐ महेशाय नमः।
22. ॐ छायापुत्राय नमः।
23. ॐ शर्वाय नमः।
24. ॐ शततूणीरधारिणे नमः।
25. ॐ चरस्थिरस्वभावाय नमः।
26. ॐ अचञ्चलाय नमः।
27. ॐ नीलवर्णाय नमः।
28. ॐ नित्याय नमः।
29. ॐ नीलाञ्जननिभाय नमः।
30. ॐ नीलाम्बरविभूशणाय नमः।
31. ॐ निश्चलाय नमः।
32. ॐ वेद्याय नमः।
33. ॐ विधिरूपाय नमः।
34. ॐ विरोधाधारभूमये नमः।
35. ॐ भेदास्पदस्वभावाय नमः।
36. ॐ वज्रदेहाय नमः।
37. ॐ वैराग्यदाय नमः।
38. ॐ वीराय नमः।
39. ॐ वीतरोगभयाय नमः।
40. ॐ विपत्परम्परेशाय नमः।
41. ॐ विश्ववन्द्याय नमः।
42. ॐ गृध्नवाहाय नमः।
43. ॐ गूढाय नमः।
44. ॐ कूर्माङ्गाय नमः।
45. ॐ कुरूपिणे नमः।
46. ॐ कुत्सिताय नमः।
47. ॐ गुणाढ्याय नमः।
48. ॐ गोचराय नमः।
49. ॐ अविद्यामूलनाशाय नमः।
50. ॐ विद्याविद्यास्वरूपिणे नमः।
51. ॐ आयुष्यकारणाय नमः।
52. ॐ आपदुद्धर्त्रे नमः।
53. ॐ विष्णुभक्ताय नमः।
54. ॐ वशिने नमः।
55. ॐ विविधागमवेदिने नमः।
56. ॐ विधिस्तुत्याय नमः।
57. ॐ वन्द्याय नमः।
58. ॐ विरूपाक्षाय नमः।
59. ॐ वरिष्ठाय नमः।
60. ॐ गरिष्ठाय नमः।
61. ॐ वज्राङ्कुशधराय नमः।
62. ॐ वरदाभयहस्ताय नमः।
63. ॐ वामनाय नमः।
64. ॐ ज्येष्ठापत्नीसमेताय नमः।
65. ॐ श्रेष्ठाय नमः।
66. ॐ मितभाषिणे नमः।
67. ॐ कष्टौघनाशकर्त्रे नमः।
68. ॐ पुष्टिदाय नमः।
69. ॐ स्तुत्याय नमः।
70. ॐ स्तोत्रगम्याय नमः।
71. ॐ भक्तिवश्याय नमः।
72. ॐ भानवे नमः।
73. ॐ भानुपुत्राय नमः।
74. ॐ भव्याय नमः।
75. ॐ पावनाय नमः।
76. ॐ धनुर्मण्डलसंस्थाय नमः।
77. ॐ धनदाय नमः।
78. ॐ धनुष्मते नमः।
79. ॐ तनुप्रकाशदेहाय नमः।
80. ॐ तामसाय नमः।
81. ॐ अशेषजनवन्द्याय नमः।
82. ॐ विशेषफलदायिने नमः।
83. ॐ वशीकृतजनेशाय नमः।
84. ॐ पशूनां पतये नमः।
85. ॐ खेचराय नमः।
86. ॐ खगेशाय नमः।
87. ॐ घननीलाम्बराय नमः।
88. ॐ काठिन्यमानसाय नमः।
89. ॐ आर्यगणस्तुत्याय नमः।
90. ॐ नीलच्छत्राय नमः।
91. ॐ नित्याय नमः।
92. ॐ निर्गुणाय नमः।
93. ॐ गुणात्मने नमः।
94. ॐ निरामयाय नमः।
95. ॐ निन्द्याय नमः।
96. ॐ वन्दनीयाय नमः।
97. ॐ धीराय नमः।
98. ॐ दिव्यदेहाय नमः।
99. ॐ दीनार्तिहरणाय नमः।
100. ॐ दैन्यनाशकराय नमः।
101. ॐ आर्यजनगण्याय नमः।
102. ॐ क्रूराय नमः।
103. ॐ क्रूरचेष्टाय नमः।
104. ॐ कामक्रोधकराय नमः।
105. ॐ कलत्रपुत्रशत्रुत्वकारणाय नमः।
106. ॐ परिपोषितभक्ताय नमः।
107. ॐ परभीतिहराय नमः।
108. ॐ भक्तसंघमनोऽभीष्टफलदाय नमः।

॥ इति श्री शनि अष्टोत्तरशत नामावली सम्पूर्णम ॥

॥ श्री शनि चालीसा ॥

- **दोहा**

जय गणेश गिरिजा सुवन, मंगल करण कृपाल।
दीनन के दुःख दूर करि, कीजै नाथ निहाल॥
जय जय श्री शनिदेव प्रभु, सुनहु विनय महाराज।
करहु कृपा हे रवि तनय, राखहु जन की लाज॥

- **चौपाई**

जयति जयति शनिदेव दयाला। करत सदा भक्तन प्रतिपाला ॥ ॥ १ ॥
- चारि भुजा, तनु श्याम विराजै। माथे रतन मुकुट छवि छाजै॥ ॥ २ ॥
- परम विशाल मनोहर भाला। टेढ़ी दृष्टि भृकुटि विकराला॥ ॥ ३ ॥
- कुण्डल श्रवण चमाचम चमके। हिये माल मुक्तन मणि दमके॥ ॥ ४ ॥
- कर में गदा त्रिशूल कुठारा। पल बिच करैं अरिहिं संहारा॥ ॥ ५ ॥
- पिंगल, कृष्णों, छाया, नन्दन। यम, कोणस्थ, रौद्र, दुःख भंजन॥ ॥ ६ ॥
- सौरी, मन्द, शनि, दशनामा। भानु पुत्र पूजहिं सब कामा॥ ॥ ७ ॥
- जा पर प्रभु प्रसन्न है जाहीं। रंकहुं राव करैं क्षण माहीं॥ ॥ ८ ॥
- पर्वतहू तृण होई निहारत। तृणहू को पर्वत करि डारत॥ ॥ ९ ॥
- राज मिलत वन रामहिं दीन्हो। कैकेइहुं की मति हरि लीन्हो॥ ॥१०॥
- बनहूं में मृग कपट दिखाई। मातु जानकी गई चतुराई॥ ॥११॥
- लखनहिं शक्ति विकल करिडारा। मचिगा दल में हाहाकारा॥ ॥१२॥
- रावण की गति मति बौराई। रामचन्द्र सों बैर बढ़ा ई॥ ॥१३॥
- दियो कीट करि कंचन लंका। बजि बजरंग बीर की डंका॥ ॥१४॥
- नृप विक्रम पर तुहि पगु धारा। चित्र मयूर निगलि गै हारा॥ ॥१५॥
- हार नौलाखा लाग्यो चोरी। हाथ पैर डरवायो तोरी॥ ॥१६॥
- भारी दशा निकृष्ट दिखायो। तेलिहिं घर कोल्हू चलवायो॥ ॥१७॥
- विनय राग दीपक महँ कीन्हों। तब प्रसन्न प्रभु ह्वै सुख दीन्हों॥ ॥१८॥
- हरिश्चन्द्र नृप नारि बिकानी। आपहुं भरे डोम घर पानी॥ ॥१९॥
- तैसे नल पर दशा सिरानी। भूंजी-मीन कूद गई पानी॥ ॥२०॥
- श्री शंकरहि गहयो जब जाई। पार्वती को सती कराई॥ ॥२१॥
- तनिक विलोकत ही करि रीसा। नभ उड़ि गयो गौरिसुत सीसा॥ ॥२२॥
- पाण्डव पर भै दशा तुम्हारी। बची द्रोपदी होति उधारी॥ ॥२३॥
- कौरव के भी गति मति मारयो। युद्ध महाभारत करि डारयो॥ ॥२४॥
- रवि कहं मुख महं धरि तत्काला। लेकर कूदि परयो पाताला॥ ॥२५॥
- शेष देव-लखि विनती लाई। रवि को मुख ते दियो छुड़ई॥ ॥२६॥
- वाहन प्रभु के सात सुजाना। जग दिग्ज गर्दभ मृग स्वाना॥ ॥२७॥

- जम्बुक सिंह आदि नख धारी। सो फल ज्योतिष कहत पुकारी॥ ॥२८॥
- गज वाहन लक्ष्मी गृह आवैं। हय ते सुख सम्पत्ति उपजावै॥ ॥२९॥
- गर्दभ हानि करै बहु काजा। गर्दभ सिंद्धकर राज समाजा॥ ॥३०॥
- जम्बुक बुद्धि नष्ट कर डारै। मृग दे कष्ट प्राण संहारै॥ ॥३१॥
- जब आवहिं प्रभु स्वान सवारी। चोरी आदि होय डर भारी॥ ॥३२॥
- तैसहि चारि चरण यह नामा। स्वर्ण लौह चाँजी अरु तामा॥ ॥३३॥
- लौह चरण पर जब प्रभु आवैं। धन जन सम्पत्ति नष्ट करावै॥ ॥३४॥
- समता ताम्र रजत शुभकारी। स्वर्ण सर्वसुख मंगल कारी॥ ॥३५॥
- जो यह शनि चरित्र नित गावै। कबहुं न दशा निकृष्ट सतावै॥ ॥३६॥
- अदभुत नाथ दिखावैं लीला। करैं शत्रु के नशि बलि ढीला॥ ॥३७॥
- जो पण्डित सुयोग्य बुलवाई। विधिवत शनि ग्रह शांति कराई॥ ॥३८॥
- पीपल जल शनि दिवस चढ़ाव त। दीप दान दै बहु सुख पावत॥ ॥३९॥
- कहत राम सुन्दर प्रभु दासा। शनि सुमिरत सुख होत प्रकाशा॥ ॥४०॥

- **दोहा** पाठ शनिश्चर देव को, की हों विमल तैयार।
  करत पाठ चालीस दिन, हो भवसागर पार॥

॥ इति शनि चालीसा सम्पूर्णम॥

॥ शनि देव जी की आरती ॥

- **जय जय श्री शनिदेव भक्तन हितकारी ।**
  सूर्य पुत्र प्रभु छाया महतारी ॥ जय जय श्री शनि देव ... ।

- **श्याम अंग वक्र-दृष्टि चतुर्भुजा धारी ।**
  नीलाम्बर धार नाथ गज की असवारी ॥ जय जय श्री शनि देव ... ।

- **क्रीट मुकुट शीश सहज दिपत है लिलारी ।**
  मुक्तन की माला गले शोभित बलिहारी ॥ जय जय श्री शनि देव ... ।

- **मोदक मिष्ठान पान चढ़त हैं सुपारी ।**
  लोहा तिल तेल उड़द महिषी अति प्यारी ॥ जय जय श्री शनि देव ... ।

- **देव दनुज ऋषि मुनि सुमिरत नर नारी ।**
  विश्वनाथ धरत ध्यान शरण हैं तुम्हारी ॥ जय जय श्री शनि देव ... ।